दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

■ पृष्ठ-5 ■ वर्ष-5 ■ अङ्क-142

1 मार्च 14, 2026 Website- www.himsanskritam.com Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रकृष्णैकादशी
फाल्गुण 30 प्रविष्ठांशः मङ्गलमयः भवेत्

2 प्रधानमंत्रिणा कृषकाणां कल्याणाय असमराज्ये विविधानां परियोजनानां लोकार्पणं कृतम्

3 हिमाचलसर्वकारः वहिष्यति राष्ट्रियमार्गाणां केषाञ्चित् भागानां दायित्वम्; केन्द्रीयमन्त्रालयेन निर्गता अधिसूचना

4 संस्कृताध्ययनकेन्द्रे पुस्तकवितरणकार्यक्रमः- जी. डी. मोदी ऑफ आर्ट्स, पालनपुरं, गुजरातम्

## हिन्दमहासागरे भारतस्य हितानां रक्षणार्थं सर्वकारः समुचितान् उपायान् कुर्वन् अस्ति - विदेशमन्त्री



**हिमसंस्कृतवार्ताः** - हिन्दमहासागरक्षेत्रे सर्वाणि विकासकार्याणि, ये भारतस्य सुरक्षायाः आर्थिकहितेषु च प्रभावं कुर्वन्ति, तेषां निरीक्षणं निकटतया प्रचलति । विदेशमन्त्री डा. एस्. जयशङ्करः लोकसभायां एकस्य प्रश्नस्य प्रत्युत्तरे अवदत् यत् हिन्दमहासागरे भारतस्य हितानां रक्षणार्थं सर्वकारः समुचितान् उपायान् कुर्वन् अस्ति । सः अवदत् यत् हिन्दमहासागरप्रदेशेन सह अन्यैः देशैः सह भारतस्य सम्बन्धाः स्वयमेव स्वतन्त्राः सन्ति, तृतीयेन देशेन सह सम्बन्धाः च भिन्नाः सन्ति ।

## भारतीय-रेल-विभागेन प्रायः सप्तसप्ततिः प्रतिशतं यावत् समयबद्धतायाः लक्ष्यं प्राप्तम्- अश्विनी वैष्णवः

**हिमसंस्कृतवार्ताः** - रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् भारतीय-रेल-विभागेन प्रायः सप्तसप्ततिः प्रतिशतं यावत् समयबद्धतायाः लक्ष्यं प्राप्तम् अस्ति, येषु चतुर्विंशति क्षेत्रीय रेल विभागैः नवतिः प्रतिशतोप्यधिकं समयपालनम् अभिलिखितम् । राज्यसभायां प्रश्नोत्तरकाले प्रत्युत्तरं प्रददन् श्रीवैष्णवः अवदत् यत् नियतसमयसीमायां रेलयानानाम् आगमनस्य प्रतिशतस्य आधारेण समयबद्धतायाः मापनं भवति । सः संसूचितवान् यत् रेल-विभागेन स्वस्य बृहज्जालस्य कार्यक्षमतां वर्धयितुं अनेकाः कार्यनीतयः स्वीकृताः सन्ति । सः अवदत् यत् सूचना प्रौद्योगिकी-आधारिता प्रणाली कृत्रिमबुद्धिमत्ता आधारितं विश्लेषणम्, रेलमार्गाणां उन्नयनम् इत्यादीनि उन्नत प्रौद्योगिकी-साधनानि रेलयानानां समयसूच्यां विद्यमानानां संरचनात्मक-समस्यानां समाधानं कुर्वन्ति । मन्त्रिणा स्वीकृतं यत् यद्यपि वर्तमान-समयबद्धता फ्रान्स्, जर्मनी, इटली इत्यादिभिः देशैः सह तुलनीया अस्ति, तथापि भारतेन जपानदेशस्य अपेक्षया स्वकीयं मानकं स्थापयितुम् प्रयत्नं करणीयम् ।

# बोडो-प्रदेशः, वृद्धेः स्थिरतायाः च नूतने युगे प्रविष्टवान् - प्रधानमन्त्री नरेन्द्रमोदी



**हिमसंस्कृतवार्ताः** - केन्द्रस्य भाजपा-नेतृत्वस्य एन्. डी. ए-सर्वकारः बोडो-प्रादेशिक परिषद्-क्षेत्रस्य सर्वांगीण-विकासाय कार्य कुर्वन् अस्ति, तस्य द्रुत-विकासाय पञ्चदश-शत-कोटिरूप्यकाणि स्वीकृतानि इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम् । असम-राज्यस्य कोकराझार-मण्डले आभासीय माध्यमेन जनसभां सम्बोधयन् गुवाहाटी-नगरे सः एतत् उक्तवान् ।

प्रधानमन्त्री अधोरेखितवान् यत्, दशकान् यावत् हिंसायाः रक्तपातस्य च अनुभवः प्राप्तः बोडो-प्रदेशः, वृद्धेः स्थिरतायाः च नूतने युगे प्रविष्टवान्, सहस्रशः युवकाः मुख्यधारायां सम्मिलयितुं स्वशस्त्राणि समर्पितवन्तः । बोडोलैण्ड-क्षेत्रस्य दीर्घकालिक उपेक्षायाः विषये काङ्ग्रेस-दलस्य निन्दां कुर्वन् प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् भाजपा नेतृत्वे एन्. डी. ए-सर्वकारः अस्य क्षेत्रस्य सर्वांगीणविकासाय कार्यं कुर्वन् अस्ति । गुवाहटी-नगरे प्रधानमन्त्री अशीत्यधिक षट्शतोत्तर ऊनविंशतिसहस्र कोटि रूप्याकाणां विभिन्नानां विकास-परियोजनानां भूमि-पूजनम्, उद्घाटनं, राष्ट्राय समर्पणं च करिष्यति ।

## भारत-ईरान सम्बन्धः ऊर्जा-आपूर्तिः तथा नागरिकाणां सुरक्षा च भारतस्य प्राथमिकता

हिमसंस्कृतवार्ता, नवदेहली। पश्चिम-एशियाक्षेत्रस्य वर्तमानस्थितिं दृष्ट्वा भारतेन ईरान-देशात् ऊर्जायाः वस्तूनां च निर्बाध-आपूर्तेः महत्त्वं प्रतिपादितम्। विदेशमन्त्रालयस्य प्रवक्ता रणधीर जायसवाल इत्यनेन प्रोक्तं यत् प्रधानमंत्री नरेन्द्र मोदी ईरान-देशस्य राष्ट्रपतिना डॉ. मसूद पेजेशकियन महोदयेन सह वार्तालापं कृतवान्।

### नागरिकाणां सुरक्षा तथा कूटनीतिः

प्रवक्त्रा उक्तं यत् ईरान-देशे खाड़ी-क्षेत्रे च भारतीयनागरिकाणां सुरक्षा भारतस्य सर्वोपरि प्राथमिकता अस्ति। भारतं सर्वान् विवादान् संवाद-कूटनीति-माध्यमेन समाधानं कर्तुं स्वपक्षे दृढम् अस्ति। विदेशमन्त्रालये स्थापितः नियन्त्रणकक्षः (Control Room) पूर्णतः सक्रियः अस्ति, यत्र अधुना यावत् ९०० दूरभाष-आह्वानानि तथा २०० ई-मेल सन्देशाः प्राप्ताः। विगतदिनेषु १७० भारतीयाः ईरान-सीमातः आर्मेनिया-देशं प्राप्ताः।

### समुद्री-व्यापारः बन्दरगाह-सञ्चालन च

पत्तन-पोत-परिवहन-मन्त्रालयस्य विशेषसचिवः राजेश कुमार सिन्हा अवदत् यत् होर्मुज-जलडमरूमध्यस्य पश्चिमे २४ भारतीय-ध्वजवाहकाः पोताः, पूर्वे च त्रयः पोताः सन्ति। देशस्य सर्वेषु प्रमुखेषु समुद्रीपतनेषु 'मानक-सञ्चालन-प्रक्रिया' (SOP) प्रसारिता, येन निर्यातक-कम्पनीनां कृते व्यवस्था सुकरा भवेत्। सर्वकारः भारतीय-नाविकानां राष्ट्रिय-हितस्य च रक्षणाय प्रतिबद्धः अस्ति।

### ऊर्जा-आपूर्तिः आत्मनिर्भरता च

पेट्रोलियम-मन्त्रालयस्य संयुक्तसचिवः सुजाता शर्मा स्पष्टीकृतवती यत्: भारतं पेट्रोल-डीजल-उत्पादने आत्मनिर्भरम् अस्ति।
सर्वाः परिष्करणीशालाः (Refineries) शतप्रतिशत-क्षमया कार्यं कुर्वन्ति, अपरिष्कृततैलस्य (Crude Oil) पर्याप्तः भण्डारः अस्ति।
गृहप्रयोगाय-पीएनजी (PNG) तथा वाहनानां कृते सीएनजी (CNG) आपूर्तिः निर्बाधा भविष्यति। १.५ कोटि ग्राहकेभ्यः निरन्तर-आपूर्तिः सुनिश्चिता कृता।

### एलपीजी (LPG) स्थितिः अफवाह-निवारणं च

एलपीजी-विषये सचिवया उक्तं यत् चिन्तायाः आवश्यकता नास्ति। प्रतिदिनं ५० लक्षं सिलिण्डर-वितरणं भवति। सा जनान् 'आतङ्क-क्रीतम्' (Panic buying) न कर्तुं तथा जनश्रुतिभिः दूरे स्थातुं आग्रहं कृतवती। अनावश्यकपूंजीकरण-कृष्णविपणनयोः (Black marketing) विरुद्धं कठोर-कार्याचरणं भविष्यति।

## सुभाषितम्

**दंभो दर्पोऽभिमानश्च,**
**क्रोधः पारुष्यमेव च।**
**अज्ञानं चाभिजातस्य,**
**पार्थ! संपदमासुरीम्।।**

अर्थात्- हे अर्जुन! आसुरी सम्पत्ति के साथ उत्पन्न हुए मनुष्य में दम्भ, दर्प, अभिमान, क्रोध, निष्ठुरता और अज्ञान होते हैं।







## ऋतु-विभागेन अरुणाचलप्रदेशे, असम्-राज्ये, मेघालये च प्रचण्डवृष्टेः पूर्वानुमानं कृतम्

**हिमसंस्कृतवार्ताः** - भारतीय-ऋतु-विभागेन (आई. एम्. डी.) इत्यनेन अद्य अरुणाचलप्रदेशे, असम्-राज्ये, मेघालये च प्रचण्डवृष्टेः पूर्वानुमानं कृतम् अस्ति। छत्तीसगढ, विदर्भ, पञ्जाब, उपहिमालयी-पश्चिमवङ्ग-राज्यं, सिक्किम, उत्तराखण्ड इत्येतेषु प्रदेशेषु अपि मेघगर्जनेन विद्युद्योतनेन च सह तीव्रवायोः ऋतु-विभागेन पूर्वानुमानं प्रकटितम्। आई. एम. डी. इत्यस्यानुसारं, अद्य मध्यप्रदेशे, अरुणाचलप्रदेशे, असम-राज्ये, मेघालये, मराठवाडायां, नागालैण्ड-राज्ये, मणिपुरे, मिजोरम-राज्ये, त्रिपुरायां, राजस्थाने चापि एतादृशी स्थिति भविष्यति। अत्रान्तरे, हिमाचलप्रदेशे, कोङ्कणे, गोवाराज्ये च उष्णतरङ्गस्य स्थितिः अपेक्षितम् अस्ति, यत्र गुजरात्-प्रदेशे उष्ण-आर्द्र-ऋतोः स्थितिः प्रचलिष्यति।

# प्रधानमंत्रिणा कृषकाणां कल्याणाय असमराज्ये विविधानां परियोजनानां लोकार्पणं कृतम्




**हिमसंस्कृतवार्ता गुवाहाटी।** प्रधानमंत्री नरेन्द्रमोदी उक्तवान् यत् भाजपा-नेतृत्वे एनडीए-सर्वकारः देशे कृषकाणां कल्याणेन सह तेषाम् आयवृद्ध्ये प्राथमिकतां ददाति, तथा च कृषि-क्षेत्रस्य आधुनिकीकरणाय प्रतिबद्धः अस्ति। गुवाहाटी-नगरे एकस्यां जनसभायां देशस्य ९.३२ कोटिभ्यः अधिकेभ्यः कृषकेभ्यः 'पीएम-किसान' योजनायाः २२ तमं देयं वितीर्य प्रधानमंत्री अवदत् यत् विगतैकादशवर्षेषु सर्वकारेण कृषकाणाम् आयवर्धनाय अनेके उपायाः कृताः। सः केन्द्रसर्वकारस्य पूर्वतनदशवर्षीयशासने कृषि-क्षेत्रस्य उपेक्षां कर्तुं कांग्रेस-दलस्य आलोचनां कृतवान्।
प्रधानमंत्री अवदत् यत् असमस्य एनडीए-सर्वकारः पूर्वोत्तरराज्यानां कृते आदर्शं स्थापयति। देशस्य विकासयात्रायाम् अस्याः 'अष्टलक्ष्म्याः' (पूर्वोत्तरराज्यानां) महत्त्वपूर्णां भूमिका वर्तते। अस्मिन् अवसरे प्रधानमंत्री प्रायः १९,६८० कोटिरूप्यकाणां विकासपरियोजनानां शिलान्यासं लोकार्पणं च कृतवान्। सः चाय-उद्यानश्रमिकाणां कृते भूमिपत्राणि अपि समर्पितवान्। प्रधानमन्त्रिणा १५० मेगावाट क्षमतायुक्ता 'कोपिली' जलविद्युत्-परियोजना राष्ट्राय समर्पिता।तैलक्षेत्रे अपि प्रधानमन्त्रिणा 'नुमालीगढ़-सिलीगुड़ी' उत्पाद-पाइपलाइन-क्षमतावर्धनपरियोजनायाः उद्घाटनं कृतवान्, येन नुमालीगढ़-रिफाइनरी-संस्थानस्य क्षमता प्रतिवर्षं ९ मिलियन मीट्रिक-टनं यावत् भविष्यति। सः 'पूर्वोत्तर-गैस-ग्रिड' परियोजनायाः प्रथमचरणस्य अपि उद्घाटनं कृतवान्।

## परिवहनं रेलसेवा चः

प्रधानमंत्री रङ्गिया-मुरकोंगसेलेक, चपरमुख-डिब्रूगढ, बदरपुर-सिलचर इत्यादिक्षेत्राणां रेल-विद्युतीकरणपरियोजनाः राष्ट्राय समर्पितवान्। जलमार्गेषु बिश्वनाथ-घाटे नेमाटी-नगरे च क्रूज-टर्मिनलानां शिलान्यासः कृतः। गुवाहाटी-नगरे 'पीएम एकता मॉल' इत्यस्य अपि शुभारम्भः अभवत्।
प्रतिकूलवातावरणकारणात् कोकराझार-भ्रमणस्य स्थगनं जातम्, अतः प्रधानमन्त्रिणा तत्र वीडियो-कॉन्फ्रेंस-माध्यमेन सम्बोधितम्। सः 'असम माला' परियोजनायाः तृतीयचरणस्य आधारशिलां स्थापितवान् तथा च तिस्रः नवीनाः रेलयानानि (कामाख्या-चारलापल्ली अमृत भारत एक्सप्रेस, गुवाहाटी-नई जलपाईगुड़ी एक्सप्रेस, नारंगी-अगरतला एक्सप्रेस) हरितसङ्केतेन प्रस्थानं कारितवान्।
प्रधानमंत्री आगामिदिने सिलचर-नगरे २३,५५० कोटिरूप्यकाणां परियोजनानां शिलान्यासं करिष्यति।

# 'वोकल् फॉर लोकल्' 'आत्मनिर्भरभारत' इत्येताभ्यां भावनाभ्यां देशस्य हस्ततन्तुक्षेत्रं सुदृढी-कृतम् - गिरिराजसिंहः



**हिमसंस्कृतवार्ताः** - वस्त्रोद्योगमन्त्री गिरिराजसिंहः अवदत् यत् 'वोकल् फॉर लोकल्' 'आत्मनिर्भरभारत' इत्येताभ्यां भावनाभ्यां देशस्य हस्ततन्तुक्षेत्रं सुदृढी-कृतम्, तथा च एतत् देशस्य अद्वितीयस्य परिचयस्य प्रतिनिधित्वं करोति । राज्यसभायां अनुपूरकप्रश्नानां उत्तरं प्रददन् श्रीसिंहः अवदत् यत् श्रीनरेन्द्रमोदिनः नेतृत्वे पंचदशोत्तर द्विसहस्रतमे वर्षे प्रथमवारं 'राष्ट्रीय-हस्ततन्तु-दिवसस्य' उत्सवः आचरितः ।

# फिच-रेटिंग्स-: भारतस्य सकल-गृह-उत्पाद-वृद्धिदरस्य अनुमानं संवर्धितम्



नवदेहली: प्रमुखवैश्विक-ऋण-निर्धारण-संस्था (Credit Rating Agency) 'फिच-रेटिंग्स' इत्यनया वित्तवर्षे २०२५-२६ कृते भारतस्य सकल-घरेलू-उत्पाद-वृद्धिदरस्य (GDP) अनुमानं ७.४ प्रतिशततः प्रवर्ध्य ७.५ प्रतिशतं कृतम्।

**आर्थिक-दृढ़ता तथा गृहालुयाचना**

एजेन्सी-संस्थायाः अनुसारं यद्यपि विगतयोः मासयोः आर्थिकगतिविधिषु काचित् अस्थायी मन्दता दृष्टा, तथापि गृहप्रयोगाय (घरेलू) वस्तूनां याचना सुदृढा अस्ति, अर्थव्यवस्थायाः स्थितिः अपि बलयुक्ता वर्तते।

**उपभोक्तृ-व्ययः निवेशश्च**

**संस्थायाः कथनमस्ति यत्:**

•वृद्धिदरस्य मुख्यकारणं घरेलू-मागः भविष्यति।
•अस्मिन् वित्तवर्षे उपभोक्तृ-व्यये ८.६ प्रतिशतस्य वृद्धिः सम्भाव्यते।
•निवेशे अपि ६.९ प्रतिशतस्य संवर्धनस्य अनुमानं वर्तते।

**विकासस्य अन्ये सङ्केतकाः**

वैश्विकव्यापारस्य मन्दतायाः अनन्तरमपि जीएसटी-सङ्ग्रहः (GST collection), निर्माणक्षेत्रम्, विमानयात्रा तथा डिजिटल-देयम् इत्यादिभिः उच्च-सङ्केतकैः विकासस्य गतिः तीव्रा दृश्यते। आगामि-वित्तवर्षे २०२६-२७ कृते फिच-रेटिंग्स इत्यनया भारतस्य वृद्धिदरः ६.७ प्रतिशतं भविष्यति इति अनुमानं प्रकटितम्

# पाकिस्तानेन अफगानिस्तानस्योपरि सैन्य-आक्रमणं कृतम्, सीमायाम् उत्तेजना वर्धिता



पाकिस्तानेन काबुल-कंधार-पक्तिया-पक्तिका इति प्रान्तेषु अनेके सैन्य-प्रहाराः कृताः। तालिबान-प्रवक्ता ज़बीउल्लाह मुजाहिदः सूचितवान् यत् एतेषु आक्रमणेषु अनेकाः महिलाः बालकाः च मृताः। अनेन कारणेन अफगानिस्तान-पाकिस्तानयोः सीमायां तनावः अत्यधिकं वर्धितः अस्ति। तालिबान-शासनेन एतत् आक्रमणम् अफगानिस्तानस्य 'सार्वभौमिकतायाः' उल्लङ्घनं घोषितम्। प्रवक्ता उक्तवान् यत् पाकिस्तानी-सेनया पुनः अफगानिस्तानस्य उपरि बम-वर्षणं कृतम्। श्री मुजाहिदः सामाजिक-माध्यमेन (Social Media) अवदत् यत् केषुचित् स्थानेषु गृहाणि लक्ष्यीकृत्य प्रहाराः कृताः, यत्र निरपराधाः बालकाः महिलाः च प्राणान् त्यक्तवन्तः। सेनया मरुस्थलानि अन्यक्षेत्राणि अपि लक्ष्यीकृतानि। सः आरोपं कृतवान् यत् पाकिस्तानस्य सैन्य-विमानेन कंधार-अन्तर्राष्ट्रीय-विमानपत्तनस्य समीपे **'काम एयर'** इति निजी-विमानन-संस्थायाः इन्धन-भण्डारस्य उपरि अपि आक्रमणं कृतम्, येन तत्र भीषणः अग्निः प्रज्वलितः।

# अश्विनीवैष्णवः अकथयत्- दौलतपुरचौकतः मुकेरियांपर्यन्तं रेलमार्गस्य कार्यं प्रचलति



हिमसंस्कृतवार्ताः- नवदेहली।केन्द्रीय-रेलमन्त्री अश्विनीवैष्णवः सूचितवान् यत् हिमाचलप्रदेशे अनेकाः महत्त्वपूर्णाः रेल-परियोजनाः प्रचलन्ति, एतासु च सहस्रशः कोटि- रूप्यकाणि व्ययन्ते। शुक्रवासरे राज्यसभायां सांसदस्य प्रश्नस्य उत्तरं ददत् केन्द्रीयमन्त्री अकथयत् यत् भानुपल्ली-बिलासपुर-बेरी, चण्डीगढ़- बद्दी, बिलासपुर-लेह इति परियोजनानां कार्यं प्रगतिपथे अस्ति। केन्द्रीयमन्त्रिणा विवृतं यत् अम्ब-अन्दौरा रेलमार्गः वर्तमानस्य मोरिण्डा-रूपनगर- आनन्दपुरसाहिब-दौलतपुरचौक मार्गस्य भागः अस्ति, अस्य च मुकेरियां, जालन्धर-जम्मू मार्गेण सह संयोजनाय विस्तारः क्रियमाणः अस्ति। अस्यां परियोजनायां नङ्गलबन्धतः दौलतपुरचौकपर्यन्तं ६० किलोमीटर-परिमितं कार्यं पूर्वमेव सम्पन्नम्, यदा तु दौलतपुरचौकतः मुकेरियांपर्यन्तं (४२ किमी) खण्डस्य कार्यं सम्प्रति प्रचलति।मन्त्रिणा उक्तं यत् भानुपल्ली-बिलासपुर-बेरी नूतन-रेलमार्गस्य (६३ किमी) परियोजना 'व्यय- सहभागिता' (Cost sharing) आधारेण स्वीकृता अस्ति, यत्र ७५ प्रतिशतं व्ययं केन्द्रसर्वकारः तथा २५ प्रतिशतं व्ययं राज्यसर्वकारः वहति। अस्याः परियोजनायाः आहत्य अनुमानितव्ययः ६७५३ कोटि-रूप्यकाणि सन्ति, यस्मिन् भूमिमूल्यं १६१७ कोटि-रूप्यकाणि सम्मिलितं वर्तते। अद्यावधि अस्यां परियोजनायां ७७२९ कोटि-रूप्यकाणि व्ययितानि सन्ति। एतदतिरिच्य पठानकोट-जोगिन्द्रनगर नैरोगेज- रेलमार्गस्य (२०० किमी) 'ब्रॉडगेज' मध्ये परिवर्तनाय सर्वेक्षणं स्वीकृतम् अस्ति। सांसदः हर्षमहाजनः अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रसर्वकारः हिमाचलप्रदेशे रेल-सम्पर्कं सुदृढं कर्तुं निरन्तरं प्रयत्नशीलः अस्ति।

# हिमाचलसर्वकारः वहिष्यति राष्ट्रियमार्गाणां केषाञ्चित् भागानां दायित्वम्; केन्द्रीयमन्त्रालयेन निर्गता अधिसूचना



हिमसंस्कृतवार्ता:- शिमला।
हिमाचलप्रदेशे राष्ट्रियमार्गाणां (NH) केषाञ्चित् भागानां पुनर्स्थापन- संरक्षणकार्याणि केन्द्रसर्वकारेण राज्यसर्वकाराय हस्तान्तरितानि सन्ति। मार्ग-परिवहन-एवं-राजमार्ग-मन्त्रालयेन अस्मिन् विषये अधिसूचना निर्गता। तथापि, प्रदेशस्य सीमावर्तिनः सामरिकमहत्त्वपूर्णाः च मार्गाः पूर्ववत् सीमा-मार्ग-सङ्घटनस्य (BRO) पार्श्वे एव स्थास्यन्ति। मन्त्रालयेन 'राष्ट्रियमार्ग-अधिनियम- १९५६' इत्यस्य धारा-५ अन्तर्गते एषा अधिसूचना कृता। मन्त्रालयेन २००५ तमस्य वर्षस्य अधिसूचनायां संशोधनं कृत्वा हिमाचलप्रदेशे स्थितानां राष्ट्रियमार्गाणां निर्माण-पुनर्स्थापन- संरक्षण- सम्बद्धानि कार्याणि राज्यसर्वकाराय दत्तानि सन्ति। अस्मिन् आदेशे राष्ट्रियमार्ग-३ इत्यस्य अनेकेषां खण्डानाम् उल्लेखः अस्ति। अस्य अन्तर्गतं नादौनतः हमीरपुरपर्यन्तं प्रायः २६ किलोमीटरमार्गः, मण्डीतः कुल्लू-मनालीपर्यन्तं प्रायः १०६ किलोमीटरमार्गः च राज्यसर्वकारस्य अधीने भविष्यति। किन्तु मनालीतः केलाङ्ग-मार्गेण हिमाचल-लद्दाख-सीमापर्यन्तं १८७ किलोमीटर-मार्गखण्डं विहाय अन्या व्यवस्था राज्यसर्वकाराय प्रदत्ता।

एवमेव राष्ट्रियमार्ग-३०३ इत्यस्य रानीतालतः नादौनपर्यन्तं ३१.४० किलोमीटरखण्डं विहाय अन्ये भागाः अस्यां व्यवस्थायां सम्मिलिताः। राष्ट्रियमार्ग- ३०५ इत्यस्य अपि केषाञ्चित् भागानां दायित्वं राज्यसर्वकारस्य भविष्यति। तथापि पावरीतः चीनीमार्गेण शिपकिला समीपे भारत- तिब्बत- सीमापर्यन्तं भागः पूर्ववत् बीआरओ (BRO) इत्यस्य पार्श्वे एव अस्ति, सः नूतनव्यवस्थायाः बाह्यः अस्ति।

### एतेषाम् अपि मार्गाणां कार्यं राज्यसर्वकारस्य हस्ते

१. राष्ट्रियमार्ग- १०५:- हरियाणा- हिमाचल-सीमातः नालागढ़पर्यन्तं खण्डं विहाय अन्यः भागः राज्यसर्वकाराय दत्तः।
२. राष्ट्रियमार्ग- ७:- पांवटा साहिबतः हिमाचल- उत्तराखण्ड- सीमापर्यन्तं केचन खण्डाः राज्यसर्वकारमाध्यमेन निर्वक्ष्यन्ते।
३. अन्ये मार्गाः- राष्ट्रियमार्गाः ५०३ए, ५०५ए, ७०५, ७०७, ९०७ए, १५४ए इत्येतेषां हिमाचलस्थितानां भागानां निर्माणं पुनर्स्थापनकार्यं च राज्यसर्वकारद्वारा भविष्यति।

केन्द्रसर्वकारेण स्पष्टीकृतं यत् राज्यसर्वकारेण राष्ट्रियमार्ग-अधिनियमस्य सर्वेषां नियमानां पालनं करणीयम्। वास्तवतः राष्ट्रियमार्गाः देशस्य प्रमुखाः मार्गाः भवन्ति, येषां स्वामित्वं नीतिनिर्धारणं च केन्द्रसर्वकारस्य अधीने भवति, किन्तु कार्यान्वयनार्थं राज्यसर्वकाराः एजेन्सयः च नियुक्ताः क्रियन्ते।

# आपणानि स्थापयितुं एडीएम-महोदयस्य अनुमतिः आवश्यकी; हड़सर-मणिमहेशमार्गे व्यापाराय अनुमतिः अनिवार्या



हिमसंस्कृतवार्ता:- चम्बा। श्रीमणिमहेशयात्राकाले हड़सरतः मणिमहेशपर्यन्तं मार्गेषु आपणानि (shops) स्थापयितुं एडीएम-कार्यालयात् अनुमतिः स्वीकर्तव्या अनिवार्या भविष्यति। मणिमहेशट्रस्ट-अन्तर्गतं ये मन्दिराणि आगच्छन्ति, तेषु QR-Code स्थापयिष्यते, येन श्रद्धालवः अन्तर्जालमाध्यमेन (Online) दानं दातुं शक्नुवन्ति। एते निर्णयाः गुरुवासरे लघुसचिवालयस्य सभागारे आयोजितायां श्रीमणिमहेशट्रस्ट- उपवेशने कार्यवाहक-एडीएम विकासशर्मणः अध्यक्षतायां स्वीकृताः।
उपवेशने एडीएम-महोदयेन विशेषतः राष्ट्रिय- हरित-अधिकरणस्य (NGT) निर्देशानुसारं मणिमहेशयात्रायाः आयोजने पर्यावरणादि- नियमानां अनुपालनं सुनिश्चितं कर्तुं विस्तरेण चर्चा कृता। सः एनजीटी-निर्देशानुसारं वनमण्डलाधिकारिणं भरमौर-वन्यप्राणि-विभागं च आदिष्टवान् यत् ते अधिकृतयात्राकाले तथा अन्यसमये अपि श्रद्धालूनां, 'ट्रैकिंग' यात्रिणां तथा व्यावसायिक-गतिविधीनां नियन्त्रणं कुर्वन्तु।

## मार्गाणां पुनर्स्थापनार्थं निर्देशः

एडीएम-महोदयेन लोकनिर्माणविभागस्य अधिकारिणः अधोलिखित-मार्गाणां पुनर्स्थापनायै निर्दिष्टाः:
> NH 154-A: बग्गातः भरमौरपर्यन्तम्।
> हड़सर-क्षेत्रम्: हड़सरतः गुई-नाला मार्गः,
> हड़सरतः डल-झील पर्यन्तं पादमार्गः, हड़सर- भरमौर मार्गः (वाया चौबिया)।
> भरमौर-भरमाणीः भरमाणी-पादमार्गः, भरमौर- भरमाणी (वाया घराडू तथा मलकौता)।
> हेलिपैडः- भरमौर-गौरीकुण्ड-स्थितयोः हेलिपैड- स्थानयोः सुदृढीकरणम्।
अस्मिन् उपवेशने जलशक्तिविभागस्य अधिशाषी अभियन्ता विजयनागः, 'वाइल्ड लाइफ' आरएफओ मनोजकुमारः, श्रीमणिमहेशट्रस्टस्य सदस्याः सुमनकुमारः, रञ्जीतकुमारः, कुलदीपसिंहः च उपस्थिताः आसन्।

# हिमाचलस्य मुख्यसचिवः सञ्जयगुप्तः अवदत्- प्रदेशे स्थितिः नियन्त्रणात् बहिर्नास्ति



हिमसंस्कृतवार्ता:- शिमला।ईरान-इस्रायल-अमेरिका-देशानां युद्धस्य कारणात् विश्वव्यापिनि पैट्रोलियम-उत्पादानां प्राकृतिक- अनिलस्य (Natural Gas) च व्यापारः प्रभावितः जातः। भारते अपि अस्य प्रभावः अधुना दृश्यते। भारतसर्वकारेण देशे 'अत्यावश्यक- वस्तु-अधिनियमः' (Essential Commodities Act) प्रवर्तितः अस्ति। अस्मिन् अन्तरे, हिमाचलप्रदेशस्य वर्तमानस्थितेः विषये मुख्यसचिवः सञ्जयगुप्तः प्रतिक्रियाम् अयच्छत्।
सः अवदत् यत् सर्वकारः निरन्तरं सर्वसाम् अपि परिस्थितीनां निरीक्षणं (Monitoring) कुर्वन् अस्ति। प्रदेशे सम्प्रति स्थितिः 'आउट ऑफ कंट्रोल' नियन्त्रणात् बहिर्नास्ति। सः अकथयत् यत् सर्वेषां जनपदानाम् उपायुक्ताः, नागरिक-आपूर्ति- विभागः, तैल-कम्पन्यः च निरन्तरं स्थितेः अद्यतन-सूचनाः (Updates) दातुं सूचिताः सन्ति। मुख्यसचिवः सञ्जयगुप्तः अवदत् यत् राज्यसर्वकारः प्रदेशे एलपीजी (LPG) अनिल-आपूर्तेः निरन्तरं पर्यवेक्षणं करोति। सः उक्तवान् यत् अस्मिन् विषये केन्द्रसर्वकारः अपि गम्भीरः अस्ति। केन्द्रसर्वकारस्य पैट्रोलियम-मन्त्रालयेन निरीक्षणं क्रियमाणं वर्तते। ह्यः एव गृहसचिवेन सर्वेषां राज्यानां मुख्यसचिवैः सह चर्चा कृता। सः अवदत् यत् अनिल-आपूर्तेः विषयः केन्द्रसर्वकारस्य अधीने अस्ति, केन्द्रेण च घरेलू-एलपीजी-आपूर्तिः प्राथमिकतात्वेन स्वीकृता अस्ति। सः अकथयत् यत् राज्यसर्वकारस्य पार्श्वे व्यावसायिक- एलपीजी-कूप्यकाणि अपि उपलब्धानि आसन्, यानि उपाहारगृहेभ्यः खाद्य-उद्योगेन सम्बद्धेभ्यः जनेभ्यः च प्रदातुं निर्दिष्टम् अस्ति। सः अन्ततः अवदत् यत् समग्रस्थितेः उपरि केन्द्रसर्वकारः राज्यसर्वकारः च तीक्ष्णां दृष्टिं स्थापयतः।

# पशुमित्र-भर्ती-प्रक्रियायाम् इदानीं 'शारीरिक-दक्षता-परीक्षा' अनिवार्या

**शिमला/प्रदेश-राजधानी:** प्रदेश-सर्वकारस्य पशुपालनविभागेन **'पशुमित्र-नीति-२०२५'** इत्यस्यां महत्त्वपूर्णं संशोधनं कुर्वता भर्ती-प्रक्रियायां **शारीरिक-दक्षता-परीक्षा** (फिजिकल टेस्ट) अनिवार्या कृता अस्ति। विभागः अस्मिन् विषये अधिसूचनाम् अपि प्रसारितवान्।नूतन-व्यवस्थायाः अनुसारं पशुमित्र-चयनार्थं शारीरिक-परीक्षायाम् अधोलिखिताः मानदण्डाः निर्धारिताः सन्तिः
**पुरुष-अभ्यर्थिनः-: ३० निमेषेषु पञ्च किलोमीटर (५ कि.मी.) धावनं पूर्णं करणीयम्।**
**महिला-अभ्यर्थिन्यः-: १० निमेषेषु १५०० मीटर धावनं पूर्णं करणीयम्।**

# संस्कृताध्ययनकेन्द्रे पुस्तकवितरणकार्यक्रमः- जी. डी. मोदी ऑफ आर्ट्स, पालनपुरं, गुजरातम्



हिमसंस्कृतवार्ता:- प्रवेशकुमारशुक्लः
संस्कृताध्ययनकेन्द्रं जी. डी. मोदी कालेज ऑफ आर्ट्स इत्यस्मिन् महाविद्यालये केन्द्रीय- संस्कृत-विश्वविद्यालयः नवदेहली द्वारा सञ्चालितमस्ति। संस्कृताध्ययनकेन्द्रे प्रमाणपत्रीय-पाठ्यक्रमः, दक्षतापाठ्यक्रमः च प्रचलति। अद्य संस्कृताध्ययनकेन्द्रे पुस्तकवितरणकार्यक्रमः सुसम्पन्नः जातः। कार्यक्रमस्य आरम्भे मंगलाचरणम् अभवत् च। एतस्य अनन्तरं डॉ. सुरेखाबेन पटेलः सर्वेषाम् अतिथीनां परिचयं कारितवती। कार्यक्रमस्य सञ्चालनं संस्कृताध्ययनकेन्द्रस्य प्रशिक्षकः हरिश्चन्द्रमहोदयः अकरोत्। कार्यक्रमस्य अध्यक्षता जी.डी मोदी इति महाविद्यालयस्य प्राचार्या केन्द्राधिकारिणी च डा. राधाबेनमहोदया आसीत्। संस्कृतसम्भाषणस्य महत्त्वं, संस्कृताध्ययनकेन्द्रस्य उद्देश्यं, भारतीयसंस्कृतेः विशेषताः च एतेषां विषये अस्मान् सर्वान् बोधितवती एवञ्च संस्कृतभाषा सर्वेषां भाषाणां माता वर्तते। कार्यक्रमस्य मुख्यातिथिरूपेण महाविद्यालयस्य गुजरातिविभागस्य अध्यक्षः डॉ. सोहनभाईदवे महोदयः आसीत्। महोदयेन उक्तं यत् संस्कृतभाषा केवलं पाठ्यक्रमी भाषा न भवेत् एषा भाषा व्यवहारिकी भाषा भवेत् एवञ्च संस्कृतभाषा दैनिकजीवने बहु-महत्त्वपूर्णा भाषा वर्तते। अस्मिन् कार्यक्रमे बहवः छात्राः उपस्थिताः आसीत्। जी. डी. मोदी कालेज ऑफ आर्ट्स इत्यस्मिन् महाविद्यालये संस्कृताध्ययनकेन्द्रस्य प्रशिक्षकः हरिश्चन्द्रः वर्तते। प्रशिक्षकेण सर्वेषाम् अतिथीनां छात्राणाञ्च आभारं ज्ञापितवान् । कार्यक्रमे प्रार्चाया राधाबेनपटेलः, संयोजिका डा. सुरेखाबेनपटेलः, डा. सोहनदवे महोदयः, डा. कल्पनाबेनपटेलः, डा. भारती बेनपटेलः, डा हेमलबेन पटेलः, डा. मुकेशप्रजापतिः इत्यादयः उपस्थिताः आसन्। कार्यक्रमे 50 छात्राः उपस्थिताः आसन्। कार्यक्रमस्य शान्तिमन्त्रेण समापनं जातम्।

# डाईट नीमचस्य सभागारे कक्षा ५ तथा ८ उत्तरपुस्तिकानां मूल्याङ्कनकार्यक्रमस्य सम्मानसमारोहस्य च सफलम् आयोजनम्



हिमसंस्कृतवार्ताः- जगदीश डाभी। जिला-शिक्षा-प्रशिक्षण-संस्थाने (डाईट) नीमचे कक्षा ५ तथा कक्षा ८ इत्येतयोः उत्तरपुस्तिकानां मूल्याङ्कनकार्यक्रमः दिनाङ्क ६ मार्चतः १२ मार्चपर्यन्तम् आयोजितः। यद्यपि कार्यक्रमस्य अन्तिमतिथिः १४ मार्च आसीत्, तथापि सर्वेषां मूल्याङ्कनकर्तॄणाम् उत्कृष्टसहयोगेन अनुशासनेन कार्यनिष्ठया च समयात् पूर्वमेव सर्वासां उत्तरपुस्तिकानां मूल्याङ्कनकार्यं सफलतया सम्पन्नम्। सम्पूर्णं कार्यं सुव्यवस्थिते, आनन्दमये तथा तनावमुक्ते वातावरणे सम्पन्नम्। कार्यक्रमस्य समापनावसरे प्रेरणादायकः सम्मानसमारोहः आयोजितः, यस्मिन् मुख्यातिथिरूपेण माननीयः जिला- शिक्षाधिकारी सुजानमलमांगरियामहोदयः उपस्थितः आसीत्। कार्यक्रमस्य शुभारम्भः सुजाताभगिनीद्वारा मातुः सरस्वत्याः वन्दना अनन्तरं दिग्विजयपालीवालः महोदयेन प्रेरणादायकं सामूहिकगीतं प्रस्तुतम्। कार्यक्रमस्य प्रस्तावना कार्यक्रमसंचालकेन पंकज गुर्जरः महोदयेन प्रस्तुता तथा संस्थानस्य प्राचार्यः निर्मलराठौरमहोदयः उपस्थितान् सर्वान् अतिथीन् मूल्याङ्कनकर्तॄन् च स्वागतं कृत्वा अध्यक्षीयम् उद्बोधनम् अददात्।मूल्याङ्कनकार्ये उत्कृष्टप्रदर्शनं कृतवन्तः दशविषयेषु श्रेष्ठमूल्याङ्कनकर्तारः सम्मानिताः। तथा प्रत्येकविषयस्य विषयप्रभारिणः अपि सम्मानिताः येन मूल्याङ्कनव्यवस्था सुचारुरूपेण सञ्चालिता। कार्यक्रमे निर्मिते नियन्त्रणकक्षे (कंट्रोल रूम) उत्तरपुस्तिकानां वितरणं ग्रहणं, सुरक्षितसंरक्षणं पैकेजिंगकार्यं सुव्यवस्थितरूपेण सम्पन्नम्। तस्मात् कारणात् नियन्त्रणकक्षस्य प्रभारीणाम् अपि सम्मानः कृतः।तदनन्तरं सम्पूर्णस्य कार्यक्रमस्य सुचारुसञ्चालनाय कार्यरतस्य सञ्चालनसमूहस्य अभिनन्दनं कृतम्। संस्थानस्य कार्येषु समर्पितभावेन उल्लेखनीययोगदानं कृतवन्तः सप्त कर्मचारीणः विशेषरूपेण सम्मानिताः।अन्ते जिला-शिक्षाधिकारी सुजानमलमांगरिया महोदयेन प्रेरणादायकं मार्गदर्शनम् प्रदत्तम्, येन सर्वे उत्तमकार्यं कर्तुं प्रेरिताः। कार्यक्रमस्य अन्ते डॉ. रिचाजायसवालमहोदया सर्वेषां प्रति आभारं प्रकटितवती। एवम् अयं मूल्याङ्कनकार्यक्रमः चायपानसहितं सफलतया सम्पन्नः।

## हिमाचलप्रदेशस्य विद्यालयेषु उद्यानकृषिः (Horticulture) पाठयिष्यते; नवमीतः द्वादशीकक्षापर्यन्तं व्यावसायिकपाठ्यक्रमस्य आरम्भः

हिमसंस्कृतवार्ताः- धर्मशाला।
हिमाचलप्रदेशस्य विद्यालयीय- शिक्षाबोर्डः (धर्मशाला) राज्यस्य यूनां स्वमृत्तिकया स्थानीयसंसाधनैश्च सह योजनार्थं शिक्षाक्षेत्रे विशालं परिवर्तनं कर्तुं सज्जः अस्ति। बोर्ड-प्रशासनेन राजकीय- सम्बद्धविद्यालयेषु नवमीतः द्वादशीकक्षापर्यन्तं 'उद्यानकृषिः' व्यावसायिक-विषयरूपेण आरब्धुं योजना निर्मिता।
मुख्यबिन्दवः-

- अनुमोदनम्: प्रस्तावितः अयं पाठ्यक्रमः अन्तिम-स्वीकृतये 'राष्ट्रीय- व्यावसायिक-प्रशिक्षण- परिषदे' (NCVT) प्रेषितः अस्ति।
- सत्रम्- एषा योजना २०२६-२७ शैक्षणिकसत्रात् प्रवर्तयिष्यते।
- द्वैत-श्रेणी स्थितिः- बोर्ड-प्रशासनेन अचिरादेव 'ड्यूल-कैटेगरी' इति स्थितिः प्राप्ता, येन राज्यस्य भौगोलिक- आर्थिक-आवश्यकतानुसारं व्यावसायिक- पाठ्यक्रमाणां निर्माणस्य अधिकारः तस्मै प्राप्तः।

**पाठ्यक्रमस्य महत्त्वम्:-**
हिमाचलप्रदेशस्य अर्थव्यवस्थायां सेब- कीवी- आम्र- नास्पती- आदिफलानां कृषिः मुख्या भूमिकां निर्वहति। एतद् दृष्ट्वा अस्मिन् पाठ्यक्रमे केवलं सिद्धान्ताः न, अपि तु व्यावहारिक-प्रशिक्षणम् अपि प्राधान्यं प्राप्स्यति। छात्राः निम्नलिखितविषयान् पठिष्यन्ति-
१. पादप-संवर्धनम् २. आधुनिक-कृषि-तकनीकः ३. रोग-नियन्त्रणम् ४. उद्यान-प्रबन्धनम्
ड्यूल-कैटेगरी प्राप्त्यनन्तरं बोर्ड-प्रशासनं राज्य-विशिष्ट- कौशलविकासे ध्यानं केन्द्रयति। हिमाचलप्रदेशे उद्यानकृषिः मुख्यव्यवसायः अस्ति, अतः एषः निर्णयः छात्राणां भविष्ये आधारस्तम्भः सिद्धः भविष्यति।"
-डॉ. मेजर विशाल शर्मा, सचिवः, विद्यालयी- शिक्षाबोर्डः धर्मशाला।

## "वन्दे संस्कृतमातरम्"
## "लौकिकन्यायकोशः"
## "पाटच्चरयामिकन्यायः"

चौर्यं कृत्वा चौरे पलायनं कृत्वा गते सति सुरक्षकस्य नियुक्तिः कस्मै प्रयोजनाय? सुरक्षादृष्ट्या सुरक्षकस्य नियुक्तिः पूर्वमेव कर्तव्या भवति। एवं गतजले सेतुबन्धनमिव एतत् व्यर्थं भवति।
**डा. वर्षा प्रकाश टोणगांवकर पुणे / महाराष्ट्रम्**

## वार्ता-संवादः

हिमसंस्कृतवार्ताः, ईदरधीरजः,हैदराबादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।
**काव्या-** नमस्ते नन्दिनि। अद्य मया एका महती चिन्ताजनिका वार्ता श्रुता। एकया महिलया स्वशिशुः द्विचक्रीकायाः कोषे स्थापितः। ततः सा यानं चालितवती अस्ति। एतत् चलचित्रं जाले सर्वैः दृष्टम्।
**नन्दिनी-** अहो! अतीव कष्टकरम् एतत्। शिशोः सुरक्षा एवं उपेक्षिता अनया। अन्या वार्ता तु विदेशतः आगता। तत्र एकायाः कर्मकर्याः कृते "आलुकम्" इति अपशब्दः तस्याः स्वामिना प्रयुक्तः। अतः न्यायालयेन तस्यै एकोनत्रिंशत्-लक्ष-रूप्यकाणि क्षतिपूर्तिरूपेण दत्तानि।
**काव्या-** सत्यम्, वाण्याः अपि मूल्यं भवति इति सिद्धम्। इदानीं महती शोचनीया वार्ता। एकः पुरुषः त्रयोदश वर्षाणि यावत् अचेतनावस्थायां स्थितवान् अस्ति। तस्य कष्टं निवारयितुं सर्वोच्च-न्यायालयस्य आदेशेन तस्मै शान्ति-मरणम् अनुमतम्। एतादृशः निर्णयः भारते प्रथमवारं कृतः।
**नन्दिनी-** उचितम्, तस्य वेदनायाः अन्तः जातः। अन्ते एका शुभा वार्ता। केरल-प्रान्तस्य एकया शिल्पिनी-वर्यया त्यक्तवस्तुभिः सुन्दरं गजभूषणं रचितवती अस्ति। तस्याः कार्यं राष्ट्रपत्या अपि दृष्टं प्रशंसितं च।
**काव्या-** अहो कलायाः महिमा! अनुपयोगि-वस्तुतः अपि किञ्चित् उत्तमं निर्मितम्। एषा वार्ता अस्मान् बोधयति। अद्यतनः कार्यक्रमः अत्रैव समाप्यते। नमो नमः।